श्री गुरुभ्यो नमः हरिः ॐ

# श्रीमदानन्दतीर्थ भगवत्पादाचार्य विरचितः
# श्री कृष्णजयन्ती निर्णयः

---

रोहिण्या मध्यरात्रे तु यदा कृष्णाष्टमी भवेत् ।
जयन्ती नाम सा प्रोक्ता सर्वपापप्रणाशनी(नं) ॥ १॥

यस्यां जातो हरिः साक्षान्नि शेते भगवानजः ।
तस्मात्तद्दिनमत्यर्थं पुण्यं पापहरं शुभपरं ॥ २॥

तस्मात्सर्वैरुपोश्या सा जयन्ती नाम सा(वै) सदा ।
द्विजातिभिर्विशेषेण तद्भक्तैश्च विशेषतः ॥ ३॥

यो भुङ्क्ते तद्दिने मोहा(लोभा)त् पूयशोणितमत्ति सः ।
तस्मादुपवासेन्नित्य(पुण्य) तद्दिने(नं) श्रद्धयान्वितः ॥ ४॥

कृत्वा शौचं यथा न्यायं स्नानं कुर्यादतंद्रितः ।
प्रभात काले कुर्वीत योओगायेत्यादिमन्त्रतः ॥ ५॥

नित्याह्निकं प्रकुर्वीत भगवन्तमनुस्मरन् ।
मध्याह्न काले च पुमान् सायङ्काले त्वतन्द्रितः ॥ ६॥

स्नायेत पूर्वमन्त्रेण वासुदेवमनुस्मरन् ।
ततः पूजां प्रकुर्वेत विधिवत्सुसमाहितः ॥ ७॥

यनायेति च मन्त्रेण श्रद्धाभक्तियुतः पुमान् ।
कृष्णं च बलभद्रं च वसुदेवं च देवकीं ॥ ८॥

नन्दगोपं यशोदाञ्च सुभद्रां तत्र पूजयेत् ।
(अर्घ्यं दत्वा समभ्यर्च्याभ्युधिते शशिमण्डले) ।
जातः कंसवधार्ताय भूभारोत्थारणाय च ॥ ९॥

कौरवानां विनाशाय दैत्यानां निधनाय च ।
पाण्डवानां हितार्थाय धर्मसंस्थापनाय च ॥ १० ।

गृहाणर्घ्यं मया दत्तं देवक्या सहितो हरिः ।
अर्घ्यं दत्वासमभ्यर्च्याभ्युदिते शशिमण्डले ॥ ११ ॥

क्षीरोदार्णवसम्भूत अत्रिनेत्र समुद्भवः ।
गृहाणर्घ्यं मया दत्तं रोहिण्या सहितः शशिम् ॥ १२ ॥

दत्वार्घ्यं मनुनानेन उपस्थाय विधुं बुधः ।
शशिने चन्द्रदेवाय सोमदेवाय छेन्दवे ॥ १३ ॥

मृगिणे शी(सि)त बिंबाय लोकदीपाय दीपिणे ।
(रोहिणीसक्तचित्ताय कन्यादानप्रदायिने)
शीतदीदितिबिंबाय तारकापतये नमः ॥ १४ ॥

उपसम्हृत्य तत्सर्वं ब्रह्मचारी जितेन्द्रियः ।
विश्वायेति च मन्त्रेण ततः स्वापं समाचरेत् ॥ १५ ॥

ततो नित्यान्हि कं कृत्वा शक्तितो दीयतां धनं ।
सर्वायेति च मन्त्रेण ततः पारणमाचरेत् ।
धर्मायेति ततः स्वस्थो मुच्यते सर्वकिल्बिषैः ॥ १६ ॥

॥ इति श्रीमदानन्दतीर्थ भगवत्पादाचार्य विरचितं॥

॥ जयन्ती निर्णयः संपूर्णम्॥

भारतीरमणमुख्यप्राणान्तर्गत श्रीकृष्णार्पणमस्तु

---

Please send corrections to info@dvaita.org
Last updated December 23, 1997